
ISSN: 2582-7219



# International Journal of Multidisciplinary Research in Science, Engineering and Technology

*(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)*



Impact Factor: 8.206

Volume 8, Issue 7, July 2025

www.ijmrset.com ijmrset@gmail.com +91 6381 907 438 +91 63819 07438

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807065

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

# नैतिकशिक्षायाःसंवर्धने नीतिसाहित्यस्योपादेयता

**Dr. Laxman Kumar, नीता**

Assistant Professor, Department of Education, National Sanskrit University, Tirupati, A.P, India

Research Scholar in Education, National Sanskrit University, Tirupati, A.P, India

**प्रस्तावना:**
संस्कृतसाहित्ये विविधविषयेषु अनेकानेकग्रन्थाः संरचिताः। अस्मिन्नेव क्रमे नीतिसंवर्धनेऽपि अनेकग्रन्थाः प्रतिपादिताः यथा चाणक्यनीतिः, कामन्दकनीति , कणिकनीतिः विदुरनीतिश्चादयः । नैतिक शिक्षा इति शब्दः संस्कृते नयधातुना सिद्ध्यति तस्य अर्थो भवति यत् (नयति इति नीतिः) या सम्यक् दिशायां अस्माकं व्यवहाराय नयति सा नीतिः ताम् आधारित या शिक्षा सा नैतिकशिक्षा इति। नैतिक मूल्यसंवर्धने नैतिकशिक्षा तादृशी शिक्षा वर्तते यथा स्वकीयं सर्वेषां रक्षा हितञ्च भवति। महात्मागांधिनाऽपि कृषितं यत् "मूल्यशिक्षा मानवस्य सर्वाङ्गीण विकासस्य कुंजी वर्तते। येषु प्रासादिकशैलीद्वारा जीवनस्य चरमोत्कर्ष प्राप्तये, जीवनस्य दशा एवञ्च दिशा-निर्माणे अत्यन्तोपयोगिमूल्यानां वर्णनं कृतमस्ति। नीतिशतकेऽपि नैतिकमूल्यानां वर्धने परोपकारिता वीरता साहस-उद्योग उदारता एतेषां बिन्दूनां विश्लेषणं संश्लेषणं करोति ग्रन्थकर्ता। वास्तविके यदि मस्तिष्कं हृदयं च दूषित विचारेभ्यः अपाकर्तुं प्रयासं कृत्वा विचारयामस्तु ज्ञायते यत् नैतिकतायाः वास्तविक लक्ष्यं मनुष्यं अज्ञानात्, मोहात्, कुसंस्कारात्, परमुखपक्षितायाः च रक्षणमेव यस्योद्धरणं भर्तृहरि स्वकीय नीतिशतके स्पष्टतया प्रयच्छति। ग्रन्थोऽयं मानवजीवने सद्गुणोपार्जनेन मूल्यसंवर्धनेन च सार्थकं कर्तुं बलं दीयते ग्रन्थ दृष्ट्या संसारे व्यवर्हत्तुं मनुष्ये वैविध्य पूर्ण दक्षता आवश्यकी। कवेरपि स्पष्टोद्घोषः वर्तते।
**शौर्यं शत्रुजने, क्षमा गुरूजने, नारीजने धूर्तता,**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः।** नीतिशतकमाधृत्य जीवनयापनेन शिक्षणेन च नूनमेव मूल्यानां परिरक्षणं संवर्धनञ्च जायते- "या शिक्षा मानवेषु नैतिक गुणानां विकासः करोति तथा तेषां चरित्रम् उज्ज्वलं करोति। तेषु मानवतायाः उदात्त गुणानाम् अभिवर्धनं करोति सैव नैतिक शिक्षा इति कथ्यते। नैतिक शिक्षा युक्तजनाः सदैव नम्रः उदारस्वानुशासितः शान्तिप्रियः, जागरूकः, सहिष्णवः कर्त्तव्य परायणश्च वर्तते।
पशुवत् सामान्य जीवनयापनाय आहारं,निद्रा,भयः,मैथुनम् इत्यादिनां सहक्रियाणामावश्यकता वर्तते। तद्वत् मानवमते सति मानवानां गुणानामावश्यकता वर्तते। गुणेनैव मानव पशुमध्ये वयं भेदं कर्तु शक्नुमः यतोहि पशुसु मानवेषु च आहार निद्रा भय मैथनादिकं सहज क्रियाः वर्तन्ते उक्तश्च ।
**"आहारनिद्राभय मैथुनञ्च, सामान्य मेतत् पशुर्भिनराणां ।**
**ज्ञानम् हि तेषामधिकं विशिष्टं, ज्ञानेन हीना पशुः र्भिसमाना ।'**
सत्यवादितः परहित कामना, सहिष्णुता बन्धुत्वभावनायाः विनयस्य, सदाचारस्य परोपकारस्य करूणायाः दयायाः त्यागः ईश्वरोपरिः आस्था इत्यादीनां सदगुणानां शिक्षा नैतिकशिक्षा द्वारा दातुम् शक्यते।
**गीतायानुसारम् -** भगवान श्री कृष्णः गीतायां मानवानां कृते बहवः उपदेशः नैतिकता विषये दत्तवन्तः तद्यथा-भयस्याभावः अन्तःकरणस्य शुद्धताः, तत्त्वज्ञानस्य दृढ स्थितिः साहित्यकऔदार्य, इन्द्रियाणां दमनं, पवित्रता शत्रुभावनायाः अभावः समरसताश्च इत्यादि गुणान् प्राप्ते सति मनुष्ये नैतिकता युक्तो भवति । त्यागस्यभावना, स्वाध्यायस्यवृत्तिः, कष्टयनुभूतस्यक्षमता, चिन्तनस्य स्थिरता, निन्दारहितः, दयाभावना, क्षमाधैर्य नैतिकतायाः सन्दर्भ विविधविद्वान्सः स्वमतम् प्रकटितवन्तः तेषामवलोकेन निष्कर्षः आयाति यत् यस्मात् कारणात् मानवः मानवः अस्ति तेषां कारणानां, गुणानां वा स्वजीवने आगमनमेव नैतिक शिक्षा, मूल्यशिक्षेति वयं कथितुं शक्नुमः इति।
**नहि ज्ञानेन सदृशं पवित्रमिह विद्यते**।
वर्तमान समये अस्माकं देशः विज्ञानं तथा प्रौद्योगिकी इत्यादि क्षेत्रे संसारे विकासशीलराष्ट्रेषु स्थानं प्राप्तवान्। आधुनिक समये अस्माकं जीवने पाश्चात्य संस्कृतेः अत्याधिकं प्रभावो दृश्यते। प्राचीन कालादेव अस्माकं देशः स्वसंस्कृत्याः परम्परादीनां विषये विश्वेऽत्याधिकः प्रसिद्धिरासीत्। अथ च सर्वे जनाः भारतीय संस्कृतिः तथा संस्कृतमाध्यमेनैव जानन्ति स्म। उक्तञ्च- **"भारतस्य प्रतिष्ठे द्वे, संस्कृतं संस्कृतिस्तथा"**
परञ्च अद्य पाश्चात्य संस्कृतिनाम् अस्माकमुपरि आघातः कृतः तेन अस्माकं भारत देशस्य नैतिकमूल्यानां ह्रासो जातः। एतस्मात् कारणादेव, मानवेषु वैमनस्यता, अव्यवहारिकता स्वार्थादिनां, शास्त्रनिषिद्धकार्याणां वृद्धिः सर्वत्र दरीदृश्यते। अस्मिन्नेव सन्दर्भे सत्यमेव उक्तं भतृहरिना-

© 2025 IJMRSET | Volume 8, Issue 7, July 2025| DOI:10.15680/IJMRSET.2025.0807065

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

**दाक्षिण्यं स्वजने, दयापरिजने शाठ्यं सदा दुर्जने, प्रीतिः साधुजने, नयो नृपजने, विद्वज्जने चार्जवम्।**
**शौर्यं शत्रुजने, क्षमागुरूजने, नारीजने धूर्तता, ये चैवं पुरुषाः कलासु कुशलास्तेष्वेवलोकस्थितिः।** स्वजनेषु औदार्यं, भृत्यजनेषु कृपा, खलजनेषु विप्रियकारित्वं, शिष्टपुरुषे स्नेहः, राजसु नीतिः सुपण्डितलोकेषु सारल्यं, शत्रुजनेषु पराक्रमः, पित्रादिषु सहिष्णुत्वं, कान्ताजनेषु चातुर्यम् इत्येवमुक्तविधासु कलासु ये जनाः निपुणास्तेषु पुरुषेष्विव लोकस्थितिः अस्ति। एते एव सज्जनाः लोके मर्यादां स्थापयन्ति। नैतिकमूल्यानां स्वरूपम् अर्थो वा मानवव्यवहारस्य निर्धारकत्तत्त्वानि मूल्यानि भवन्ति भारतीय धर्मग्रन्थेषु मूल्यशब्दस्य प्रयोगः शीलम् इति शब्दार्थ कृतोऽस्ति यं न मूल शब्दस्य पर्यायो अपितु तत्समवाची शब्दो जीवने शीलमेव सद्गुणस्य साधकम् इति । यत्र शीलं तत्रैव धर्म सत्यं तेजो बलञ्च निवसन्ति न हि किंचिदसाध्यं शीलवताम्। **उक्तञ्चमहाभारते "शीलेन हि त्रयोलोकाः शक्या जेतुं न संशयः। न हि किंचिदसाध्यं लोकेशीलवतां भवेत् ।।'** मानव जीवने दिशा निर्देशस्य कार्य मूल्यानि एव कुर्वन्ति। मानव मूल्यानि एव मानवस्य मूल्यनिर्धारणं कुर्वन्ति। मानव मूल्यस्य मापने सतिनयं जानीमः मानवः केषाम् नैतिकमूल्यानामाधारेण स्वव्यक्तित्वस्य निर्माणं करोति। वर्तमान समये नैतिकमूल्यानां स्तरस्य ह्रासः दृष्ट्वा विद्वद्भिः नवीन शिक्षायां नैतिक शिक्षायां बलं ददन्ते।
**जाड्यंधियो हरति, सिञ्चतिवाचिसत्यं मानोन्नतिं दिशति, पापमपाकरोति ।**
**चेतः प्रसादयति, दिक्षु तनोति कीर्तिं, सत्सङ्गतिः कथय किं न कुरोति पुंसाम्** ?
सत्यमेवोक्तंमहर्षि भर्तृहणि -कथय सज्जन समागमः पुसां किं श्रेयो न करोति, सर्वमपि श्रेयः करोत्येव यथा एषा बुद्धेर्मान्द्यं हरति, वचने सत्यं वर्षति, बहुमानातिशयं प्रयच्छति, किल्विषं नाशयति, चित्तं प्रहर्षयति, सर्वेषु देशेषु यशः तनोति । अतस्तैरेव कर्त्तव्या, न तु दुर्जनैरिति । धर्मः संस्कृतेः अभिन्नाङ्गत्वेन विद्यते । धर्मस्य व्यावहारिकरूपं वर्तते नीतिः तु नीतेः सैद्धान्तिकरूपं वर्तते धर्मः । मानवमूल्यानां सम्बन्धो नैतिकविचारणया साकं विद्यते । सत्यनिष्ठता त्यागः कर्तव्यपरायणता चादीनि नैतिकमूल्यानि सन्ति, परञ्च देशकालपरिस्थितिषु एतानि कदाचित् विवादयुक्तानि अपि भवन्ति । **अतःराष्ट्रिय-शैक्षिक अनुसन्धान-प्रशिक्षण-परिषदा नैतिकमूल्यानाम् एका आवलिः प्रकाशिता सा च-**
**ब्रह्मचर्यम्** – बालकैः सर्वदा ब्रह्मचर्यस्य पालनेऽवधानं दातव्यम् । यथा उपनिषदि-"यदिच्छन्तौ ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् । करुणा समेषां कृते मनसि सर्वदा कारुण्यभावो भवेत् ।
**परोपकारः** – परेषां सर्वदा उपकारः करणीयः । व्यासऋषिणा अपि उक्तमस्ति "**अष्टादश पुराणेषु व्यासस्य वचनद्वयम्। परोपकारः पुण्याय पापाय परपीडनम् ।।"**
**अनुशासनम्** - उच्छृंखलतां विना आत्मनि अनुशासनं नियन्त्रणं वा।
**सहिष्णुता** - अन्येषां विचाराणां धर्माणाञ्चादरः कर्तव्यः।
**उद्देश्यपूर्णता** - जीवनस्य एकं निश्चितोद्देश्यं भवेत्। उद्देश्यविहीनं जीवनं न शोभते उक्तञ्च -"उद्देश्य जन्म का नहीं कीर्ति या धन है, सुख नहीं, धर्म नहीं, न तो दर्शन है। विज्ञान ज्ञान बल नहीं, न तो चिन्तन है, जीवन का अन्तिम ध्येय स्वयं जीवन है।।'
**कृतज्ञता** –वयं जीवने सर्वेभ्यः किञ्चिद् प्राप्नुमः अतः समेषां कृते कार्तज्ञभावो भवेदेव। **साहाय्यम्** - अस्माकं सामर्थ्यं केवलं स्वस्य कृते नापितु अन्येषां कृतेऽपि, अतः सर्वदा समेषां साहाय्यं करणीयम्।
**अहिंसा** - महाभारते उक्तं यत् **"अहिंसापरमोधर्मः"** यतोहि अन्येषां हिंसाकरणेन न तु लाभो लभते नैव पुण्यं प्राप्यते। अतएव उक्तमपि **"मा हिंसीः पुरुषान् पशूञ्च।"**
**आज्ञापालनम्** - ज्येष्ठानां, गुरूणां, मातृपित्रोः च आज्ञाः सर्वदा पालनीयाः, यतोहि ताः अस्माकं हिताय एव भवन्ति। कथितञ्च श्रीरामेण
**"गुरुश्च राजा च पिता च वृद्धः, क्रोधात् प्रहर्षादथवापि कामात्।**
**यद् व्यादिशेत् कार्यमवेक्ष्य धर्मं, कस्तं न कुर्यादनृशंसवृत्तिः।।**
**चरित्रस्य दृढता**- जीवने चरित्रमेव सर्वं भवति। शरीरस्य नाशो भविष्यति परञ्च चरित्रस्य यशः कायस्य नाशो नैव कदापि जायते। आंग्लभाषायामेका प्रसिद्धा सूक्तिः वर्तते
"If wealth is lost nothing is lost
If health is lost something is lost
If character is lost everything is lost"
ज्येष्ठानां प्रति श्रद्धा मनसि हृदि च सर्वदा ज्येष्ठान् वृद्धान् प्रति श्रद्धा भवेत् । पुराकाले तु तेषां कृते देवसंज्ञा आसीत्। उपनिषदि आचार्येण छात्राय उपदेशः दीयते स्म यत् -**"मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव.... वृद्धसेवया विज्ञानम्...।।"** भारतीयशिक्षा विश्वस्य आदर्शशिक्षा वर्तते। अद्य सम्पूर्णविश्वं भारतस्य आदर्शमूल्यानां समादरः विधीयते। सम्पूर्णविश्वे मानवतासंस्कृतिधर्म-आदर्शवादितानां च रक्षणाय एतानि नैतिकमूल्यानि परमावश्यकानि। एतेषां नैतिकमूल्यानां शिक्षया एव हस्तान्तरणं भवितुं शक्यते। एतानि नीतिमूल्यानि सम्पूर्णविश्वं प्रभावयन्ति प्रासङ्गिकानि च वर्तन्ते।

1) **विश्वबन्धुत्वम् ।**
2) **लोकतन्त्रात्मकत्वम् ।**
3) **अहिंसा।**

4) **राष्ट्रभक्तिः।**
5) **सर्वधर्मसमभावः ।**
6) **मानवता/मानवसेवा।**
7) **आध्यात्मिकता ।**
8) **सहिष्णुता ।**
9) **त्यागः।**
10) **प्रासङ्गिकता**

एतानि मूल्यानि अतिरिच्य अपि लोकनिर्णयैः सह सहमतिः, 'सर्वजनहिताय सर्वजनसुखाय भावनायाः अङ्गीकरणम्, सक्रियराष्ट्रियजागरूकता, राष्ट्रियैकता चादीनि नैतिकमूल्यानि सन्ति।

**श्रद्धा** -प्रेमादरविश्वासादीनां सम्मिलितं रूपं श्रद्धा वर्तते। जीवने प्रत्येकपरिस्थितौ ईश्वरे आत्मनि वा श्रद्धास्थापनम् अनिवार्यं वर्तते। उक्तमपि **"श्रद्धावान् लभते ज्ञानम्।"**

**सत्यान्वेषणम्** -सत्यान्वेषणेन एव आत्मावलोकनं भवति। अनेन जीवने सर्वत्र यशः उन्नतिं प्राप्तुं शक्यते। आत्मावलोकनस्य विषये उक्तमपि - **"आत्मा वा रे दृष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च ।"**

**विवेकः-** विवेकः जीवने अत्यनिवार्यो वर्तते विवेकेन एव निर्णयः स्वीकर्तव्यः।

**वैराग्यम्** -वैराग्यस्य तात्पर्यं सन्न्यासं नास्ति अपितु मोहं विना उपभोगस्य प्रवृत्तिरेव उक्तमपि -**"तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्।।" 20**

**लोककल्याणम्** -स्वार्थाय एव कार्याणि नैव करणीयानि अपितु लोकल्याणस्य भावना प्रत्येकस्मिन् कार्ये निहिता स्यात्। मूल्यान्येतानि संहृत्य यदि शिक्षाव्यवस्था भवेत् चेत् सम्प्रति अनुशासनराहित्यम्, छात्रोपद्रवः इत्यादीनां समस्यानां मूलमेव समाप्तं भविष्यति। अस्मात् भारते एव नापितु सकलेऽस्मिन् विश्वे शान्तिस्थापनायै मूल्यानि साधनत्वेन भवितुमर्हन्तीति शम् ।

**सामाजिकमूल्यानि**

मानवानां समूहः समाजः अतः समाजे निवासं कुर्वतां मानवानां समाजसम्बद्धानि यानि मूल्यानि भवन्ति तानि सामाजिकमूल्यानीति । सामाजिकमूल्यानि सर्वजनहिताय सर्वजनसुखाय भवन्ति । शास्त्रेष्वपि सूक्तम्-

**"अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।"**

सामाजिकमूल्यानामुद्देश्यं सार्वभौमिकोन्नयनं भवति। राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः ब.रा. गोयलमहोदयेन लिखितैकस्मिन् पुस्तके निम्नसामाजिकमूल्यानां निर्धारणं कृतमस्ति ।

**अस्पृश्यतोन्मूलनम्** - जात्याधारिता वर्गाधारिता अस्पृश्यता राष्ट्रस्य ऐक्यार्थं हानिप्रदा वर्तते।
सर्वे समानाः सन्ति अतः सर्वैः सह समानतायाः व्यवहारः करणीयः यथा-

**"संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे सञ्जानानामुपासते ।।' 15**

**विश्वबन्धुत्वम्** - सम्प्रति वैश्विकरणस्य युगे विश्वम् एकः परिवारः इति चिन्तनं प्रचलति । अतः शान्तिपूर्णसहास्तित्वनिमित्तं विश्वबन्धुत्वस्य भावना अत्यपेक्षिता। उक्तञ्च
"विश्वं भवेत्येकनीडम्।"

**अन्येषां प्रति सहानुभूतिः** जगत्यस्मिन् कः केन कारणेन दुखितो वर्तते इति, नैव ज्ञातुं शक्यते परञ्च तेषां कृते अस्माकं मनसि हृदि च सर्वदा भावना सहानुभूतेः भवेत् ।

**सहयोगः** - समेषां सहयोगः तेषामावश्यकतानुसारम् अथ च स्वक्षमतानुसारं करणीयः।

**शुचिता** - समाजोऽयं स्वच्छः पवित्रश्च भवेत् तदर्थम् अस्माभिः शुचिता आचरणीया।

**कर्तव्यभावना -** समाजे व्यक्तिः केवलं स्वाधिकारस्य एव स्मरणं न कुर्यादपितु स्वकीयकर्तव्यानामपि परिपालनं कुर्यात्।

**विश्वसनीयता** - साम्प्रतं सर्वत्र विश्वसनीयतायाः अभावः दृष्टिगोचरो भवति। अतः व्यक्तिना आत्मनि विश्वसनीयता अर्जनीया आचरणीया च। उक्तञ्च
"अविश्वसिते विश्वासो नैव कर्तव्यः।"

**समाजसेवा** - समाजेऽस्मिन् सुखेन सह दुःखम् अपि विद्यते । तन्निवारणाय अस्माभिर्दीनदरिद्राणामुद्धारः कर्तव्यः। सर्वे जनाः यथा अहमस्मि तथैव सन्ति इति चिन्तनीयम् -

**"मातृवत् परदारेषु परद्रव्येषु लोष्ठवत् ।**
**आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः ।।''**

**विनयशीलता -** सर्वेषां सम्माननं करणीयम्। विनयस्य आचरणं भवेत्। कौटिल्येन तु अर्थशास्त्रे उक्तं यत् विनय एव शिक्षेति तस्य प्रकारद्वयं तेन कथितम् - "कृतकः स्वाभाविकश्च विनयः।""

**जागरूकता** - समाजे व्यक्तेः अधिकाराः कर्तव्यानि च बहुवर्धितानि सन्ति। अतः तेषां ह्रासः तु न जायमानो वर्तते। तेषां शोषणं तु नैव भवति। इदृशेषु विषयेषु जनैः जागरूकतया भाव्यम्।

अनेन प्रकारेण अस्माभिः कथितुं शक्यते यत् सामाजिकनैतिकमूल्यानि मानवस्य आधारभूतक्षेत्रैः सह सम्बद्धानि सन्ति। अमूभिः मानवः मानवीयतायाः शृङ्गमधितिष्ठति। अद्य जगति वैरभावः, परस्परसंघर्षः, स्वार्थपरायणतादिविकाराः दृश्यन्ते। यदि छात्रेभ्यो पाठ्यसहगामिक्रियासु अस्य शिक्षणं दीयते चेत् तेषु विश्वबन्धुत्वस्य भावना जागृता भविष्यति। विश्वबन्धुत्वभावनायां बलं कुर्वन् वेदाः अपि उद्घोषयन्ति। यथा **यजुर्वेदे-**

**मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।**
**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**
**मित्रस्य चक्षुषा समीक्षामहे ।। (यजुर्वेद 36/18)**

अर्थात् संसारस्य सर्वे प्राणिनः परस्परं मैत्रीभावनया स्युः। अहमपि मित्रदृष्ट्या सर्वान् पश्यामि तथैव मामपि। मन्त्रोऽयं विश्वबन्धुत्वस्य भावनां दृढीकरोति। आध्यात्मिकनैतिकमूल्यानि अस्माकं जीवनस्य मूलतत्त्वानि सन्ति अतः शिक्षाप्रणाल्याम् अवश्यमेव एतेभ्यः स्थानं दातव्यम्। एतैः विना वयं भविष्यस्य समस्यानां निवारणे असमर्थाः। यतोहि अध्यात्मम् जीवनाय दिग्प्रददाति तथा च अनेन व्यक्तिः ईदृशो जायते यत् जीवनस्य विभिन्नासु परिस्थितिष्वसौ आत्मानं सन्तुलितं आध्यात्मिकमूल्यानि कर्तुम् अर्हति।

**उपसंहारः**

अस्माकं पार्श्वे विविध नीतिग्रन्थाः सन्ति, येषु नैतिकता सन्दर्भे प्रचुर मात्रायां श्लोकानि, कथाः, सूक्तिः इत्यादयः सन्ति। सम्प्रतियुगेऽस्मिन् शिक्षायाः उद्देश्यं सर्वेषां सर्वाङ्गीणविकासेन् सर्वेषां शारीरिकं मानसिकं, बौद्धिकं व्यवहारिकञ्च विकासः इति । एतेषां प्राप्तये शिक्षायां नैतिक शिक्षायाः समावेशः अत्यावश्यकः वर्तते ।

अतःमूल्यसंवर्धने नीतिशतकस्योपादेयता इति प्रासंगिकोऽयमंशः। इत्थं नीति साहित्यं समस्तमानवानां साहित्यमस्ति। अस्मिन् समस्तप्राणिभ्यः मङ्गलकामना वर्तते । एतस्य अध्ययनेन मननेन च सर्वत्र सुखं शान्तिश्च प्रसरेताम् । साहित्यमिदं त्यागशीलानां शान्तिप्रियाणां सत्यान्वेषकाणाम् ऋषीणां वचनानि सन्ति। मनुष्येषु चेत् नीतिसाहित्यं प्रति श्रद्धा भवेत् तर्हि कस्यचित् प्रकारस्य कल्याणस्य अभावः न भवेत्। विवेचनमिदं दृष्ट्वा अस्माभिरितिवक्तुं शक्यते यत् नैतिकमूल्यानां मानवजीवने बहुमहत्त्वं वर्तते। नैतिकमूल्येभ्यः रहितमानवजीवनस्य सङ्कल्पना एव व्यर्थेति।

**पुनः**

"राष्ट्रस्योन्नतये संस्कृतं संस्कृतिस्तथा'
"विना मूलं न पादपाः संस्कृतिः संस्कृतं विना' ।

**सन्दर्भग्रन्थ सूची -**

1) हितोपदेशः
2) श्रीमद्भ-वद्गीता
3) महाभारत - शांति पर्व।
4) वा.रा./2/33/14-15
5) यजुर्वेदः 26/18
6) भारतीयं संविधानम्
7) कठोपनिषद् 1/2/15
8) अज्ञातः
9) ऋग्वेदः
10) वा.रा./2/214/59
11) अब्राह्मलिंकनमहोदयः
12) तैत्तिरीयोपनिषद् शि.व./11 अनुवाक्
13) शुक्लयजुर्वेदः
14) ऋग्वेदः 9/63/1
15) कबीरः
16) हितोपदेशः 1/19
17) ऋग्वेदः 10/119/02
18) चाणक्यनीतिः 10
19) अर्थशास्त्रम् 01/05
20) श्रीमद्भगवद्गीता 04/39

ISSN: 2582-7219 | www.ijmrset.com | Impact Factor: 8.206| ESTD Year: 2018|

International Journal of Multidisciplinary Research in Science, Engineering and Technology (IJMRSET)

(A Monthly, Peer Reviewed, Refereed, Scholarly Indexed, Open Access Journal)

21) याज्ञवल्क्यस्मृतिः
22) ईशावास्योपनिषद् 01




INTERNATIONAL JOURNAL OF

MULTIDISCIPLINARY RESEARCH

IN SCIENCE, ENGINEERING AND TECHNOLOGY

| Mobile No: +91-6381907438 | Whatsapp: +91-6381907438 | ijmrset@gmail.com |

www.ijmrset.com